# Yajnikyupanishad

# याज्ञिक्युपनिषत्

## Document Information

Text title : krishna-yajurvede taittiriya-aranyake yaajnikyupanishhad

File name : yajniki.itx

Category : upanishhat, svara

Location : doc_upanishhat

Transliterated by : Sunder Hattangadi

Proofread by : Wim en Esther (wkl-evdk at knoware.nl) in addition by Sunder Wim has added commentary/vivaraNaM in a separate file.

Description-comments : krishna-yajurvede taittiriya-aranyake

Latest update : April 5, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# Yajnikyupanishad

# याज्ञिक्युपनिषत्

अम्भस्य पारे भुवनस्य मध्ये
नाकस्य पृष्ठे महतो महीयान् ।
शुक्रेण ज्योतीꣳषि समनुप्रविष्टः
प्रजापतिश्चरति गर्भे अन्तः ॥ 1.1
यस्मिन्निदꣳ सं च वि चैति सर्वं
यस्मिन् देवा अधिविश्वे निषेदुः ।
तदेव भूतं तदु भव्यमा इदं
तदक्षरे परमे व्योमन् ॥ 1.2
येनावृतं खं च दिवं मही च
येनादित्यस्तपति तेजसा भ्राजसा च ।
यमन्तः समुद्रे कवयो वयन्ति
यदक्षरे परमे प्रजाः ॥ 1.3
यतः प्रसूता जगतः प्रसूती
तोयेन जीवान् व्यचसर्ज भूम्याम् ।
यदोषधीभिः पुरुषान् पशूꣳश्च
विवेश भूतानि चराचराणि ॥ 1.4
अतः परं नान्यदणीयसꣳ हि
परात्परं यन्महतो महान्तम् ।
यदेकमव्यक्तमनन्तरूपं
विश्वं पुराणं तमसः परस्तात् ॥ 1.5
तदेवर्तं तदु सत्यमाहुस्तदेव
ब्रह्म परमं कवीनाम् ।
इष्टापूर्तं बहुधा जातं जायमानं
विश्वं बिभर्ति भुवनस्य नाभिः ॥ 1.6
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः ।

तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः ॥ 1.7
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः॥

अर्धमासा मासा ऋतवः संवत्सरश्च कल्पन्ताम् ।
स आपः प्रदुधे उभे इमे अन्तरिक्षं चापि सुवः ॥ 1.8, 1.9
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद्यशः
न संदृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीशा मनसाभिक्लृप्तो
य एनं विदुरमृतास्ते भवन्ति ॥ 1.10, 1.11 /1
अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ ॥ 1.11 /2
एष हि देवः प्रदिशोऽनु सर्वाः
पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः स जनिष्यमाणः
प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः॥

विश्वतश्चक्षुरुत विश्वतो मुखो
विश्वतो हस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी
जनयन् देव एकः ॥ 1.12, 1.13
वेनस्तत्पश्यन् विश्वा भुवनानि
विद्वान् यत्र विश्वं भवत्येकनीडम् ।
यस्मिन्निदꣳसं च वि चैकꣳस
ओतः प्रोतश्च विभुः प्रजासु॥

प्र तद्वोचे अमृतं नु विद्वान्
गन्धर्वो नाम निहितं गुहासु ।
त्रीणि पदा निहिता गुहासु
यस्तद्वेद सवितुः पिता सत् ॥ 1.14, 1.15
स नो बन्धुर्जनिता स विधाता  धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त॥

परि द्यावापृथिवी यन्ति सद्यः परि लोकान्
परि दिशः परि सुवः ।
ऋतस्य तन्तुं विततं विचृत्य
तदपश्यत् तदभवत्प्रजासु ॥ 1.16, 1.17
परीत्य लोकान् परीत्य भूतानि
परीत्य सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमभिसंबभूव ॥ 1.18
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥ 1.19
उद्दीप्यस्व जातवेदोऽपघ्नन्निरृतिं मम ।
पशूꣳश्च मह्यममावह जीवनं च दिशो दिश ॥ 1.20
मा नो हिꣳसीज्ञातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥ 1.21
पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥ 1.22
तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् 1.23
तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् 1.24
तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि ।
तन्नो गरुडः प्रचोदयात्॥

कात्यायनाय विद्महे कन्याकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥ 1.33
नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् 1.29!
यश्छन्दसामृषभो
विश्वरूपश्छन्दोभ्यश्चन्दाꣳस्याविवेश ।
सताꣳशिक्यः प्रोवाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय
ऋषिभ्यो नमो
देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरोम् ॥ 8.1
नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं

कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम् ॥ 9.1
ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दानं तपो
यज्ञ।स्तपो भूर्भुवः
सुवर्ब्रह्मैतदुपास्स्वैतत्तपः ॥ 10
यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य
कर्मणो दूराद्गन्धो वाति यथासिधारां कर्तेऽवहितमवक्रामे
यद्युवे युवे हवा विह्वयिष्यामि कर्तं
पतिष्यामीत्येवममृतादात्मानं
जुगुप्सेत् । 11
अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ॥ 12.1
सप्त प्राणा प्रभवन्ति तस्मात्
सप्तार्चिषः समिधः सप्त जिह्वाः ।
सप्त इमे लोका येषु चरन्ति
प्राणा गुहाशयान्निहिताः सप्त सप्त ॥ 12.2
अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते
सिन्धवः सर्वरूपाः ।
अतश्च विश्वा ओषधयो रसाश्च
येनैष भूतस्तिष्ठत्यन्तरात्मा ॥ 12.3
ब्रह्मा देवानां पदवीः कवीना-
मृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणाꣳस्वधितिर्वनानाꣳ
सोमः पवित्रमत्येति रेभन् ॥ 12.4
अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीꣳ सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः॥ 12.5
हꣳसः शुचिषद्वसुरन्तरिक्षस-
द्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ 12.6
यमाज्ञाता न परा नैव किंच-

नास य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया संविदान्-
अस्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥ 12.6Ka
विधर्तारꣳ हवामहे वसोः कुविद्वनाति नः ।
सवितारं नृचक्षसम् ॥ 12.6Ka
अद्यानो देव सवितः प्रजावत्सावीः सौभगम् ।
परा दुःष्वप्नियꣳ सुव ॥ 39.2
विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्मम आसुव ॥ 39.3
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥ 39.4
मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः ।
मधुद्यौरस्तु नः पिता ॥ 39.5
मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ 39.6
घृतं मिमिक्षिरे घृतमस्य योनि-
र्घृते श्रितो घृतमुवस्य धाम ।
अनुष्वधमावह मादयस्व
स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ 12.7
समुद्रादूर्मिर्मधुमाꣳ उदार-
दुपाꣳशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति
जिह्वा देवानाममृतस्य नाभिः ॥ 12.8
वयं नाम प्रब्रवामा घृतेना-
स्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं
चतुःशृङ्गोऽवमीद्गौर एतत् ॥ 12.9
चत्वारि शृङ्गा त्रयो अस्य पादा
द्वेशीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्याꣳ आविवेश ॥ 12.10
त्रिधा हितं पणिभिर्गुह्यमानं

गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकं जजान
वेनादेकꣳ स्वधया निष्टतक्षुः ॥ 12.11
यो देवानां प्रथमं पुरस्ता-
द्विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानꣳ
स नो देवः शुभयास्मृत्या संयुनक्तु ॥ 12.12
यस्मात्परं नापरमस्ति किञ्चि-
द्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठ-
त्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ 12.13
न कर्मणा न प्रजया
धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां
बिभ्राजते यद्यतयो विशन्ति ॥ 12.14
वेदान्तविज्ञानविनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे॥

दह्रं विपापं वरवेश्मभूत यत्पुण्डरीकं
पुरमध्यसꣳस्थम् ।
तत्रापि दह्रं गगनं विशोकम्
तस्मिन्यदन्तस्तदुपासितव्यम् ।
यो वेदादौ स्वरः प्रोक्तो
वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य
यः परः स महेश्वरः ॥ 12.15, 16, 17
आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचा
मण्डलꣳ
स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि
सामानि स

साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि
यजूꣳषि स यजुषा मण्डलꣳ स यजुषां लोकः सैषा
त्रय्येव
विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः । 14
आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो
मन्युर्मनुर्मृत्युः
सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं
तत्सत्यमन्नममृतो
जीवो विश्वः कतमः स्वयम्भु ब्रह्मैतदमृत एष पुरुष एष
भूतानामधिपतिर्ब्रह्मणः सायुज्यꣳ
सलोकतामाप्नोत्येतासामेव
देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ
समानलोकतामाप्नोति य एवंवेदेत्युपनिषत् । 15.1
घृणिः सूर्य आदित्योमर्चयन्ति तपः सत्यं मधु क्षरन्ति
तद्ब्रह्म तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः
सुवरोम् । 15.2
सर्वो वै रुद्रस्तस्मै रुद्राय नमोऽस्तु ।
पुरुषो वै रुद्रः सन्महो नमो नमः ।
विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च
यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ 24
कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम
शंतमꣳ हृदे ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ 25
नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये
पशुपतये नमो नमः ॥ 22
प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तक-
स्तेनान्नेनाप्यायस्व ॥ 74, internet version splits after vishAntakaH
अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥ 71
मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा
सुमनस्यमाना ।

त्वया जुष्टा जुषमाणा दुरुक्तान्बृहद्वदेम विदथे सुवीराः ॥ 41.1
त्वया जुष्ट ऋषिर्भवति देवि
त्वया ब्रह्मागतश्रीरुत त्वया ।
त्वया जुष्टश्चित्रं विन्दते वसु
सा नो जुषस्व द्रविणेन मेधे ॥ 41.2
मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा 42.1, internet version has puShkarasrajau ।
अप्सरासु या मेधा गन्धर्वेषु च यन्मनः ।
दैवी मेधा सरस्वती स मां मेधा
सुरभिर्जुषताम् ॥ 42.2
आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका
जुषताम् ॥ 43
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥ 17
वामदेवाय नमो ज्येष्ठाय नमः रुद्राय
नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो
बलप्रमथाय नमः सर्वभूतदमनाय नमो
मनोन्मनाय नमः ॥ 18
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः शर्व
सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ 19
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः
प्रचोदयात् ॥ 20
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम् 21
ब्रह्ममेतु माम् । मधुमेतु माम् । ब्रह्ममेव मधुमेतु माम् ।
यास्ते सोम प्रजा वत्सोऽभि सो अहम् । दुःष्वप्रहन्
दुरुष्षह ।
यास्ते सोम प्राणाँ स्तां जुहोमि ।
त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा
एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं
प्राप्नुवन्ति ।

आ सहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ 38
ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधुमेधया ।
अद्यानो देव सवितः प्रजावत्सावीः सौभगम् । परा
दुःष्वप्नियꣳ सुव । विश्वानि देव सवितर्दुरितानि
परासुव । यद्भद्रं तन्म tanmama? आसुव
मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः
सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ
रजः । मधुद्यौरस्तु नः पिता । मधुमान्नो
वनस्पतिर्मधुमाꣳ
अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् ।
भ्रूणहत्यां वा एते घ्नन्ति ।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आ
सहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ 39 (appears twice in the book version)
ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधु मेधवा ।
ब्रह्मा देवानां पदवीः कवीना-
मृषिर्विप्राणां
महिषो मृगाणाम् ।
श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ
सोमः पवित्रमत्येति रेभन् ॥

हꣳसः शुचिषद्वसुरन्तरिक्षस-
द्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ 40.1, 2, 3
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् ।
वीरहत्यां वा एते घ्नन्ति ।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति ।
आसहस्रात् पङ्क्तिं पुनन्ति । ओम् ॥ 40.6
सत्यं परं परꣳ सत्यꣳ सत्येन न
सुवर्गाल्लोहाच्च्यवन्ते
कदाचन सताꣳ हि सत्यं तस्मात्सत्ये रमन्ते 78.1

तप इति तपो नानशनात्परं यद्धि परं तपस्तद्
दुर्धर्षं तद् दुराधष तस्मात्तपसि रमन्ते 78.2
दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते 78.3
शम इत्यरण्ये मुनस्तमाच्छमे रमन्ते 78.4
दानमिति सर्वाणि भूतानि प्रशꣳसन्ति दानान्नातिदुष्करं
तस्माद्दाने रमन्ते 78.5
धर्म इति धर्मेण सर्वमिदं परिगृहीतं
धर्मान्नातिदुश्चरं तस्माद्धर्मे रमन्ते 78.6
प्रजन इति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायन्ते
तस्माद्भूयिष्ठाः प्रजनने रमन्ते 78.7
अग्नय इत्याह तस्मादग्नय आधातव्या 78.8
अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते 78.9
यज्ञ इति यज्ञेन हि देवा दिवं गतास्तस्माद्यज्ञे रमन्ते 78.10
मानसमिति विद्वाꣳसस्तस्माद्विद्वाꣳस एव मानसे रमन्ते 78.11
विद्वांसः सगुणज्ञाः स्युर्मनःसाध्यं तु मानसम् ।
उपासनं परं हेतुरित्येते मेनिरे बुधाः ॥ ४०६॥

न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा
एतान्यवराणि तपाꣳसि न्यास एवात्यरेचयत् 78.12
प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं
भगवन्तः परमं वदन्तीति तस्मै प्रोवाच 79.1
सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः
प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं
वदन्ति 79.2
तपसा देवा देवतामग्र आयन् तपसार्षयः
सुवरन्वविन्दन्तपसा
सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं
तस्मात्तपः परमं वदन्ति 79.3
दमेन दान्ताः किल्बिषमवधून्वन्ति दमेन ब्रह्मचारिणः
सुवरगच्छन् दमो भूतानां दुराधर्षं दमे सर्वं
प्रतिष्ठितं तस्माद्दमः परमं वदन्ति 79.4
शमेन शान्ताः शिवमाचरन्ति शमेन नाकं

मुनयोऽन्वविन्दञ्छमो
भूतानां दुराधर्षं शमे सर्वं प्रतिष्ठितं
तस्माच्छमः परमं वदन्ति 79.5
दानं यज्ञानां वरूथं दक्षिणा लोके दातारँ
सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन
द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं
परमं वदन्ति 79.6
धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठ प्रजा
उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं
तस्माद्धर्मं परमं वदन्ति 79.7
प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तन्तुं तन्वानः
पितृणामनुणो भवति  तदेव तस्यानृणं तस्मात्प्रजननं
परमं वदन्ति 79.8
अग्नयो वै त्रयी विद्या देवयानः पन्था गार्हपत्य ऋक्
पृथिवी रथन्तरमन्वाहार्यपचनः यजुरन्तरिक्षं
वामदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्
परमं वदन्ति 79.9
अग्निहोत्रँ सायं प्रातर्गृहाणां निष्कृतिः स्विष्टँ
सुहुतं यज्ञक्रतूनां प्रायणँ सुवर्गस्य लोकस्य
ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति 79.10
यज्ञ इति यज्ञो हि देवानां यज्ञेन हि देवा दिवं गता
यज्ञेनासुरानपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे
सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति 79.11
मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु
पश्यति ऋषयः प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं
तस्मान्मानसं परमं वदन्ति 79.12
न्यास इत्याहुर्मनीषिणो ब्रह्माणम् 79.13 /1
ब्रह्मा विश्वः कतमः स्वयम्भूः प्रजापतिः संवत्सर इति 79.13 /2
संवत्सरोऽसावादित्यो य एष आदित्ये पुरुषः
स परमेष्ठी ब्रह्मात्मा 79.14
याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति
पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं

भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा
श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा
शान्तिः शान्त्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारꣳ
स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं
ददन्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां
प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिः 79.15
स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं
प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च
दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगत्स
सभूतꣳ स भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठाः
श्रद्धा सत्यो महस्वान्तमसोपरिष्टात् 79.16 /1
ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान् 79.16 /2
तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः 79.16 /3
वसुरण्वो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि
विश्वसृत्तेजोदास्त्वमस्यग्नेरसि वर्चोदास्त्वमसि सूर्यस्य
द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा
महसे 79.17
ओमित्यात्मानं युञ्जीत 79.18 /1
एतद्वै महोपनिषदं देवानां गुह्यं 79.18 /2
य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद् ब्रह्मणो महिमानम् 79.18 /3
तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी
शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः
काम आज्यं मन्युः पशुस्तपो।आग्निर्दमः शमयिता दानं
दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा
श्रोत्रमग्नीत् 80.1 /1
यावद्ध्रियते सा दीक्षा यदश्नाति
तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो
यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं
तदाहवनीयो या व्याहृतिरहुतिर्यदस्य विज्ञान तज्जुहोति
यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यन्दिनꣳ सायं
च तानि सवनानि 80.1 /2
ये अहोरात्रे ते दर्शपूर्णमासौ

येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते
पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः
सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथः 80.1 /3
एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते
देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो
दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः
सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो
विद्वानभिजयति तस्माद् ब्रह्मणो महिमानमित्युपनिषत् 80.1 /3

---

Encoded and proofread by Sunder Hattangadi
Also proofread by Wim en Esther wkl-evdk@knoware.nl
Wim has added commentary/vivaraNaM in a separate file.

According to Sw. Vimalananda, who has translated the Mahanarayana Upanishad (Ramakrishna Math publ.), it is also known as Yajniki Upanishad on the ground that Yajnatma Narayana is considered to be the seer of this part of the Veda (Krishna Yajurveda). This upanishad forms the tenth (last) prapathakas (Sayana's term), or prasna (Bhattabhaskara's term) of the Taittiriya Aranyaka. It is also called 'khila' (supplementary) as it deals with many rituals in daily use. There is a 'dravidapatha' and 'andhrapatha' with 64 and 80 chapters resp.!

'The yAj nikyupaniShad with a commentary in the form of kArikas by shrIpuruShottamAnandatIrtha is based
on a single manuscript found in the Adyar Library.
The yAj nikyupaniShad is also known as nArAyaNopaniShad. There is the mahAnArAyaNopaniShad belonging to the atharvaveda. edited by Col. Jacob, which has been utilised by Bloomfield in preparing his Vedic Concordance. The latter is only another version of this yAj nikyupaniShad.

The taittirIyayajurveda is divided into the sa.nhitA and the brAhmaNa portions. The brAhmaNa has the three prapAThakas for the main brAhmaNa

portion, and then the AraNyaka portion. SAyana divides the AraNyaka into ten prapAThakas, and the three prapAThakas, 7 to 9 form what is well known as the taittirIyopaniShad. The next one is accepted as a khila (supplement) and that is the yAj nikyupaniShad. BhaTTabhAskara takes the whole of the TaittirIyopaniShad as a single prashna, and there is also a slight difference in him from the arrangement of the prashnas found in sAyaNa. Otherwise the texts are the same.'

---

*Yajnikyupanishad*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*